## षष्ठः पाठः

# मम दिनचर्या

### द्वितीया विभक्तिः

रमेशः – प्रातः त्वं कदा उत्तिष्ठसि?



मोहनः – अहं प्रातः पञ्चवादने उत्तिष्ठामि।

रमेशः – अनन्तरं त्वं किं करोषि?

मोहनः – अहं प्रथमं गुरुम् ईशं च प्रणमामि, पश्चात् मातरं पितरं च नमामि।



रमेशः – ततः किं करोषि?

मोहनः – ततः अहं शौचादिक्रियां करोमि। स्नानं ततः प्राणायामं स्वल्पाहारं च करोमि। पश्चात् सार्धसप्तवादने विद्यालयं गच्छामि, तत्र पाठान् पठामि, सुलेखं लिखामि खेलामि च।



रमेशः – मोहन! तत्र त्वं कां कां भाषां पठसि?

मोहनः – अहं हिन्दीभाषां, संस्कृतभाषां, आङ्ग्लभाषां च पठामि।





रमेशः – एताः सर्वाः भाषाः त्वं पठसि? किन्तु रुचिकरा सरला च भाषा का अस्ति?

मोहनः – संस्कृतभाषा अतिरुचिकरा सरला च अस्ति।

रमेशः – पठनानन्तरं किं किं करोषि त्वम्?

मोहनः – अहं सार्धद्वादशवादने गृहम् आगच्छामि, तदा भोजनं करोमि, अनन्तरं गृहकार्यं करोमि। सायङ्काले खेलामि। ततः भोजनं कृत्वा दूरदर्शनं पश्यामि। अनन्तरं नववादने शयनं करोमि।

## शब्दार्थाः

| | |
|---|---|
| कदा = कब | वादनम् = बजे |
| पञ्चवादने = पाँच बजे | स्वल्पाहारः = कलेवा |
| सार्धसप्तवादने = साढ़े सात बजे | शौचादि क्रिया = मल-मूत्र विसर्जन |
| रुचिकरा = प्रिय लगने वाली | शयनम् = सोना |
| अनन्तरम् = बाद में | |

## अभ्यासः

१. एकपदेन उत्तरत -

(क) मोहनः कदा उत्तिष्ठति?

(ख) मोहनः सप्तवादने कुत्र गच्छति?

(ग) का भाषा रुचिकरा अस्ति?

(घ) मोहनः रात्रौ किं पश्यति?

(ङ) मोहनः कदा शयनं करोति?

२. निम्नलिखितवाक्येषु द्वितीयाविभक्तेः शब्दान् चित्वा कोष्ठके लिखत -

यथा - अहं विद्यालयं गच्छामि। [विद्यालयं]

(क) गुरुम् ईशं च प्रणमामि। [ ] [ ]

(ख) मातरं पितरं च नमामि। [ ] [ ]

(ग) अहं तत्र पाठान् पठामि। [ ]

(घ) अहं द्वादशवादने गृहम् आगच्छामि। [ ]

३. वाक्यानि रचयत -

| | | |
|---|---|---|
| कृपया | (चमसः) चमसं<br>(सुधाखण्डः)<br>(तालः)<br>(स्यूतः)<br>(माला) मालां<br>(पत्रिका)<br>(शाटिका)<br>(कुञ्चिका)<br>(कर्तरी) कर्तरीं<br>(लेखनी)<br>(अङ्कनी)<br>(जलकूपी)<br>(पुस्तकं) पुस्तकं<br>(फलं)<br>(चित्रं)<br>(पत्रं) | ददातु<br>स्वीकरोतु<br>पश्यतु<br>पठतु<br>आनयतु |

४. अधोलिखितशब्देभ्यः उचितं शब्दं चित्वा रिक्तस्थानं पूरयत –

माम्, पाठं, वस्तूनि, मित्रं, शिक्षकं

(क) अहं ................ पठामि।

(ख) सः ................ नमति।

(ग) संदीपः ................ क्रीणाति।

(घ) रमेशः ................ आह्वयति।

(ङ) सः ................ पृच्छति।

५. निर्दिष्टशब्दानां द्वितीयाविभक्तेः रूपं निम्नकोष्ठके लिखत –

| शब्दाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- बालक | बालकं | बालकौ | बालकान् |
| (क) पुरुष | ................ | ................ | ................ |
| (ख) युवक | ................ | ................ | ................ |